CS–69/06

INDIAN LANGUAGE AND LITERATURE IN SANSKRIT

Paper—II

Time : Three Hours

Full Marks : 300

Note :— Answer to be written in Devanagiri Script. Candidates should attempt Question **1** from Section-A and Question **5** from Section-B which are compulsory, and any **THREE** of the remaining questions, selecting at least **ONE** from each Section. All questions carry equal marks.

SECTION—A

1. अधस्तनेषु किमपि त्रयं प्रतिपादयत :— 20×3=60

   (क) भवभूतेर्नाट्यवैशिष्ट्यम्

   (ख) भर्तृहरेः उपदेशशैली

   (ग) भगवद्गीतोक्तः कर्मयोगः

   (घ) बाणस्य गद्यवैचित्र्यम् ।

2. कालिदासस्यालङ्कारयोजनां सोदाहरणं निबध्नीत । 60

3. भारवेरर्थगौरवम् इत्युक्तिं सनिंदर्शनं प्रतिपादयत । 60

4. उपनिषदुक्ति प्रमाणैः वेदान्तिनाम् आत्मनः स्वरूपं स्वसंस्कृतगिरा निरूपयत । 60

SECTION—B

5. A, B, C, D इति उपवर्गे केषाञ्चित् त्रयाणां व्याख्या करणीया :—

(A) (i) वागर्थाविव संपृक्तौ वागर्थ प्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

(ii) अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ वारिनिधी विगाह्य
स्थितः पृथिव्या इव मानदण्डः।। 20

(B) (i) क्रियासु युक्तैर्नृपचारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः।।

(ii) कुर्वन्नेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरः।।

20

(C) (i) नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।

(ii) प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम्।
मुष्णन्तमिव चक्षूंषि द्योतमानमिवश्रिया।। 20

(D) (i) निवर्तयामास स राजमार्गे संतापमार्तस्य पृथग्जनस्य।
मा भूत्कुमारः सुकुमारचित्तः संविग्नचेता इति मन्यमानः।।

(ii) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति।। 20

6. शुकनासोपदेशस्य महत्वं प्रतिपादनीयम्। 60

7. (a) स्वप्नवासवदत्तस्य षष्ठाङ्कस्य महत्वं प्रकटायत।

(b) निम्नलिखित श्लोकानां व्याख्या विधेया :—

(i) शममेष्यति मम शोकः कथं न वत्से त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः।।

(ii) सतां केनापि कार्येण, लोकस्याराधनं व्रतम्।
तत्प्रतीतं हि तातेन, मां च प्राणांश्च मुञ्चता।। 60

8. अधोलिखितेषु एकः प्रश्नः साधनीयः :— 60

(i) पुरुषस्य सत्तासिद्धये कानि कारणानि ?

(ii) वेदान्तसारानुसारं श्रद्धायाः लक्षणं विवेचनीयम्।

(iii) तर्कसंग्रहानुसारेण कतिविधम् कर्म ?